# ಕರ್ನಾಟಕ ಪ್ರೌಢ ಶಿಕ್ಷಣ ಪರೀಕ್ಷಾ ಮಂಡಳಿ,

ಮಲ್ಲೇಶ್ವರಂ, ಬೆಂಗಳೂರು – ೩.

## 2019-20 ನೇ ಸಾಲಿನ ಪಠ್ಯಾಧಾರಿತ

## ಎಸ್.ಎಸ್.ಎಲ್.ಸಿ. ಪರೀಕ್ಷೆ

ಶಾಲಾ ಅಭ್ಯರ್ಥಿಗಳಿಗಾಗಿ

ಪ್ರಶ್ನೆ ಪತ್ರಿಕೆಯ ಪರಿಷ್ಕೃತ ವಿನ್ಯಾಸ

ವಿಷಯ : ತೃತೀಯ ಭಾಷೆ ಸಂಸ್ಕೃತ

## तृतीयभाषा – संस्कृतम्

## तृतीयभाषा संस्कृतम्

**पीठिका –** प्रत्येकं छात्रस्य जीवने प्राथमिकं माध्यमिकं च शिक्षणम् अत्यन्तं महत्त्वं स्थानम् आवहति । यतः इदमेव उन्नतशिक्षणं प्रति आधारशिलेव भवति ।

प्राथमिकवर्षदशकस्य औपचारिकशिक्षणस्य अन्ते छात्राणाम् अधिगमनानुभवस्य गुणात्मकाधिगमनस्य च निकषोपला परीक्षा एव कर्नाटक–प्रौढशिक्षण–परीक्षा–मण्डल्या प्रचाल्यमाना (S.S.L.C.) एस्.एस्.एल्.सि. परीक्षा वर्तते । इयं च परीक्षा शिक्षणसमितेः आशयं, पोषकाणां निरीक्षाः, शिक्षकाणां वृत्तिकौशलं, छात्राणां बौद्धिकसामर्थ्यं च प्रकाशयति । अत एव शिक्षणे समयानुगुणं कानिचन परिवर्तनानि भवन्ति ।

पद्यवस्तूनां परिष्करणं तदनुगुणं पाठ्यपुस्तकेषु परिवर्तनं, शिक्षकाणां मार्गदर्शनम्, आवश्यकतानुगुणं मौल्यमापने परिवर्तनम्, एते सर्वे अंशाः शिक्षणस्य स्तरं वर्धयितुं साहाय्यकाः भवन्ति ।

निरूपणात्मकमौल्यमापनानि, सङ्कलनात्मकमौल्यमापने च निरन्तरं तथा व्यापकमौल्यमापनस्य आधारस्तम्भाः भवन्ति । निरूपणात्मकं मौल्यमापनं छात्राणाम् अधिगमनं क्रियाकलापद्वारा अन्विष्य, शिक्षकेषु बोधनकौशल्यानां संवर्धने आनुकूल्यं जनयति । छात्राणां बौद्धिकस्तरस्य मापने च साधनपरीक्षा प्रमुखं स्थानं भजते । शैक्षणिकवर्षस्य अन्ते क्रियमाणे सङ्कलनात्मके मौल्यमापने साधनपरीक्षा अपि अन्तर्भवति । तादृश – परीक्षायाः भागभूते प्रश्नपत्रे अपि परिवर्तनं आवश्यकम् । एवं अस्मिन् वर्षे परिष्कृतं पाठ्यपुस्तकं आधारीकृत्य मौल्यमापनं गुणात्मकं कर्तुं प्रश्नपत्रस्य विन्यासे परिवर्तनं कृतम् ।

### <u>प्रमुखांशाः</u>

२०१९–२०२० तमस्य शैक्षणिकवर्षस्य एस्.एस्.एल्.सि. प्रसिद्धपरीक्षायाः तृतीयभाषासंस्कृतस्य प्रश्नपत्रस्य विन्यासे परिष्कारः कृतः । अस्य प्रमुखानि उद्देश्यानि एवं भवन्ति ।

१. छात्रेषु कण्ठपाठविधानस्य दूरीकरणम् ।

२. स्मरणात्मकानां अंशानां न्यूनीकरणम् ।

३. परीक्षासमये जायमानस्य परीक्षा–अव्यवहारस्य प्रतिबन्धनम् ।

४. वस्तुनिष्ठप्रश्नानां, अतिलघूत्तराणां प्रश्नानां संख्यायां न्यूनीकरणम् ।

५. भाषासामर्थ्यवर्धनाय दीर्घोत्तरयुक्तप्रश्नानां प्रदानम् ।

६. अङ्काधारितं बोधनक्रमम् अपनेतुं घटकानुगुणं अङ्कवितरणं विहाय विषयाधारिता (Theme based) अङ्कवितरणव्यवस्था अनुसृता ।

७. गतवर्षस्य प्रश्नपत्रे A,B,C इति विभागाः आसन् । ते विभागाः इतः परं न भवन्ति ।

८. प्रश्नपत्रे आरोहणक्रमेण अङ्कयोजनं कृतम् ।

## प्रयोजनानि

१. छात्राः अङ्काधारितं पठनं, अध्यापकाः अङ्काधारितं पाठनं, पोषकाः अङ्काधारितं चिन्तनं दूरीकुर्वन्ति ।

२. पाठ्यपुस्तके प्रदत्तान् सर्वान् पाठान् शिक्षकाः पाठयन्ति । छात्राः पठन्ति च ।

३. गुणात्मकं चिन्तनं, बोधनं, मौल्यमापनानि च भवन्ति ।

४. छात्रेषु लेखनं, पठनं, भाषणं, श्रवणम् प्रभृतीनि भाषाकौशलानि अभिवर्धन्ते

५. दीर्घोत्तरयुक्तानां प्रश्नानां कृते छात्रैः अधिकम् अवधानं दीयते ।

६. छात्रेषु विषयाभिव्यक्तिसामर्थ्यम् विवर्धते ।

## प्रश्नपत्रस्य विन्यासे कृतं परिवर्तनम्
## विषयः – तृतीयभाषा संस्कृतम्

गरिष्ठाङ्काः : ८०　　　　अवधिः – २.३० घण्टाः

**(Regular Fresh)**

### १. उद्दिष्टानुगुणं प्रामुख्यम्

| 2018-19 | | | 2019-20 | | |
|---|---|---|---|---|---|
| **उद्दिष्टानि** | **प्रतिशतम्** | **प्रदत्ताङ्काः** | **उद्दिष्टानि** | **प्रतिशतम्** | **प्रदत्ताङ्काः** |
| स्मरणम् | 20 | 16 | स्मरणम् | 20 | 16 |
| धारणम् | 40 | 32 | धारणम् | 34 | 27 |
| अभिव्यक्तिः | 36 | 29 | अभिव्यक्तिः | 42 | 34 |
| प्रशंसा | 04 | 03 | प्रशंसा | 04 | 03 |
| **आहत्य** | **100** | **80** | **आहत्य** | **100** | **80** |

१. धारणात्मकप्रश्नानाम् पञ्च अङ्काः न्यूनाः जाताः ।

२. अभिव्यक्तौ पञ्च–अङ्काः अधिकाः कृताः ।

### २. विषयानुगुणं प्रामुख्यम्

| 2018-2019 | | | | 2019-2020 | | | |
|---|---|---|---|---|---|---|---|
| **विषयाः** | **प्रतिशतम्** | **प्रदत्ताङ्काः** | **प्रश्नसंख्या** | **विषयाः** | **प्रतिशतम्** | **प्रदत्ताङ्काः** | **प्रश्नसंख्या** |
| **गद्यम्** | 33 | 26 | 19 | **गद्यम्** | 29 | 23 | 14 |
| **पद्यम्** | 25 | 21 | 13 | **पद्यम्** | 29 | 23 | 11 |
| **पूरक – पाठाः** | 04 | 03 | 01 | **पूरक – पाठाः** | 04 | 04 | 01 |
| **अपठित–गद्यम्** | 04 | 04 | 01 | **अपठित–गद्यम्** | 04 | 04 | 01 |
| **व्याकरणम्** | 34 | 26 | 12 | **व्याकरणम्** | 34 | 26 | 11 |
| आहत्य | **100** | **80** | **46** | आहत्य | **100** | **80** | **38** |

१. गद्यभागे त्रयः अङ्काः न्यूनाः कृताः ।

२. पद्यभागे अङ्कद्वयं अधिकं कृतम् ।

३. पूरकपाठयोः कृते एकः अङ्कः अधिकः दत्तः ।

४. व्याकरणविभागे एकः प्रश्नः न्यूनः जातः ।

५. आहत्य अष्टप्रश्नाः न्यूनाः जाताः ।

**३. प्रश्नानुगुणं प्रामुख्यम्**

| 2018-19 | | | | | 2019-20 | | | | |
|---|---|---|---|---|---|---|---|---|---|
| **प्रश्नानां स्वरूपम्** | **प्रतिशतम्** | **प्रदत्ताः अङ्काः** | **प्रश्नानां संख्याः** | **अपेक्षितः समयः** | **प्रश्नानां स्वरूपम्** | **प्रतिशतम्** | **प्रदत्ताः अङ्काः** | **प्रश्नानां संख्याः** | **अपेक्षितः समयः** |
| वस्तुनिष्ठः | 20 | 16 | 16 | 20 | वस्तुनिष्ठः | 15 | 12 | 12 | 15 |
| अतिलघूत्तरम् | 12.50 | 10 | 10 | 10 | अतिलघूत्तरम् | 05 | 04 | 04 | 05 |
| लघूत्तरम् | 25 | 20 | 10 | 30 | लघूत्तरम् | 20 | 16 | 08 | 30 |
| दीर्घोत्तरम्–१ | 22.50 | 18 | 06 | 35 | दीर्घोत्तरम्–१ | 34 | 27 | 09 | 35 |
| दीर्घोत्तरम्–२ | 20 | 16 | 04 | 40 | दीर्घोत्तरम्–२ | 20 | 16 | 04 | 30 |
| दीर्घोत्तरम्–३ | -- | -- | -- | -- | दीर्घोत्तरम्–३ | 06 | 05 | 01 | 20 |
| **आहत्य** | **100** | **80** | **46** | **135+15** | **आहत्य** | **100** | **80** | **38** | **135+15** |

१. वस्तुनिष्ठप्रश्नेषु चत्वारः अङ्काः न्यूनाः जाताः ।

२. अतिलघूत्तरप्रश्नेषु षट् अङ्काः न्यूनाः कृताः ।

३. लघूत्तरे चत्वारः अङ्काः न्यूनाः जाताः । दीर्घोत्तरं –१ मध्ये नव अङ्काः अधिकाः जाताः ।

४. दीर्घोत्तरम् – ३ – पञ्च अङ्कानां कृते एकः प्रश्नः प्रदत्तः ।

४. प्रश्नानां संख्यासु अपि परिवर्तनं जातम् । आहत्य अष्ट प्रश्नाः न्यूनाः जाताः ।

**४. प्रश्नस्तराः**

| **2018-19** | | **2019-20** | |
|---|---|---|---|
| **स्तराः** | **प्रतिशतम्** | **स्तराः** | **प्रतिशतम्** |
| सुलभः | 30 | सुलभः | 30 |
| साधारणः | 50 | साधारणः | 50 |
| कठिनः | 20 | कठिनः | 20 |

१. अत्र किमपि परिवर्तनं न कृतम्

५. **प्रश्नप्रकाराः अङ्कवितरणञ्च**

| 2018-19 | | 2019-20 | |
|---|---|---|---|
| **प्रश्नप्रकाराः** | **अङ्कयोजनम्** | **प्रश्नप्रकाराः** | **अङ्कयोजनम्** |
| बहुविकल्पः | 12 x 1 = 12 | बहुविकल्पः | 8 x 1 = 08 |
| संयोज्य लिखत | 4 x 1 = 04 | चतुर्थपदम् | 4 x 1 = 04 |
| एकवाक्यम् | 10 x 1 = 10 | एकवाक्यम् | 4 x 1 = 04 |
| लघूत्तरम् –2-3 वाक्यानि | 10x 2 = 20 | लघूत्तरम् –2-3 वाक्यानि | 8x 2 = 16 |
| दीर्घोत्तरम् –१<br>3-4/5-6 वाक्यानि | 6 x 3 = 18 | दीर्घोत्तरम् –१<br>3-4/5-6 वाक्यानि | 9 x 3 = 27 |
| दीर्घोत्तरम् –२<br>10 वाक्यानि | 4x 4 = 16 | दीर्घोत्तरम् –२<br>10 वाक्यानि | 4x 4 = 16 |
| दीर्घोत्तरम् –३<br>10 वाक्यानि | | दीर्घोत्तरम् –३<br>10 वाक्यानि | 1x 5 = 5 |
| **आहत्य** | **46 / 80** | **आहत्य** | **38 / 80** |

१. बहुविकल्पे चत्वारः प्रश्नाः न्यूनाः जाताः ।

२. एकवाक्ये षट् प्रश्नाः न्यूनाः कृताः ।

३. लघूत्तरे द्वौ प्रश्नौ न्यूनौ जातौ ।

४. दीर्घोत्तरम् –१ मध्ये त्रयः प्रश्नाः अधिकाः जाताः ।

५. पञ्च–अङ्कानां कृते दीर्घोत्तरे एकः प्रश्नः समायोजितः ।

# ಕರ್ನಾಟಕ ಪ್ರೌಢ ಶಿಕ್ಷಣ ಪರೀಕ್ಷಾ ಮಂಡಳಿ,

## ಮಲ್ಲೇಶ್ವರಂ, ಬೆಂಗಳೂರು – ೩.

## **2019-20** ನೇ ಸಾಲಿನ ಪಠ್ಯಾಧಾರಿತ

## ಎಸ್.ಎಸ್.ಎಲ್.ಸಿ. ಪರೀಕ್ಷೆ

## ಖಾಸಗಿ ಅಭ್ಯರ್ಥಿಗಳಿಗಾಗಿ

## ಪ್ರಶ್ನೆ ಪತ್ರಿಕೆಯ ಪರಿಷ್ಕೃತ ವಿನ್ಯಾಸ

## ವಿಷಯ : ತೃತೀಯ ಭಾಷೆ ಸಂಸ್ಕೃತ

## तृतीयभाषा – संस्कृतम्

## तृतीयभाषा संस्कृतम्

**पीठिका** – प्रत्येकं छात्रस्य जीवने प्राथमिकं माध्यमिकं च शिक्षणम् अत्यन्तं महत्त्वं स्थानम् आवहति । यतः इदमेव उन्नतशिक्षणं प्रति आधारशिलेव भवति ।

प्राथमिकवर्षदशकस्य औपचारिकशिक्षणस्य अन्ते छात्राणाम् अधिगमनानुभवस्य गुणात्मकाधिगमनस्य च निकषोपला परीक्षा एव कर्नाटक–प्रौढशिक्षण–परीक्षा–मण्डल्या प्रचाल्यमाना (S.S.L.C.) एस्.एस्.एल्.सि. परीक्षा वर्तते । इयं च परीक्षा शिक्षणसमितेः आशयं, पोषकाणां निरीक्षाः, शिक्षकाणां वृत्तिकौशलं, छात्राणां बौद्धिकसामर्थ्यं च प्रकाशयति । अत एव शिक्षणे समयानुगुणं कानिचन परिवर्तनानि भवन्ति ।

पठ्यवस्तूनां परिष्करणं तदनुगुणं पाठ्यपुस्तकेषु परिवर्तनं, शिक्षकाणां मार्गदर्शनम्, आवश्यकतानुगुणं मौल्यमापने परिवर्तनम्, एते सर्वे अंशाः शिक्षणस्य स्तरं वर्धयितुं साहाय्यकाः भवन्ति ।

निरूपणात्मकमौल्यमापनानि, सङ्कलनात्मकमौल्यमापने च निरन्तरं तथा व्यापकमौल्यमापनस्य आधारस्तम्भाः भवन्ति । निरूपणात्मकं मौल्यमापनं छात्राणाम् अधिगमनं क्रियाकलापद्वारा अन्विष्य, शिक्षकेषु बोधनकौशल्यानां संवर्धने आनुकूल्यं जनयति । छात्राणां बौद्धिकस्तरस्य मापने च साधनपरीक्षा प्रमुखं स्थानं भजते । शैक्षणिकवर्षस्य अन्ते क्रियमाणे सङ्कलनात्मके मौल्यमापने साधनपरीक्षा अपि अन्तर्भवति । तादृश – परीक्षायाः भागभूते प्रश्नपत्रे अपि परिवर्तनं आवश्यकम् । एवं अस्मिन् वर्षे परिष्कृतं पाठ्यपुस्तकं आधारीकृत्य मौल्यमापनं गुणात्मकं कर्तुं प्रश्नपत्रस्य विन्यासे परिवर्तनं कृतम् ।

### प्रमुखांशाः

२०१९–२०२० तमस्य शैक्षणिकवर्षस्य एस्.एस्.एल्.सि. प्रसिद्धपरीक्षायाः तृतीयभाषासंस्कृतस्य प्रश्नपत्रस्य विन्यासे परिष्कारः कृतः । अस्य प्रमुखानि उद्देश्यानि एवं भवन्ति ।

९. छात्रेषु कण्ठपाठविधानस्य दूरीकरणम् ।
१०. स्मरणात्मकानां अंशानां न्यूनीकरणम् ।
११. परीक्षासमये जायमानस्य परीक्षा–अव्यवहारस्य प्रतिबन्धनम् ।
१२. वस्तुनिष्ठप्रश्नानां, अतिलघूत्तराणां प्रश्नानां संख्यायां न्यूनीकरणम् ।
१३. भाषासामर्थ्यवर्धनाय दीर्घोत्तरयुक्तप्रश्नानां प्रदानम् ।
१४. अङ्काधारितं बोधनक्रमम् अपनेतुं घटकानुगुणं अङ्कवितरणं विहाय विषयाधारिता (Theme based) अङ्कवितरणव्यवस्था अनुसृता ।
१५. गतवर्षस्य प्रश्नपत्रे A,B,C इति विभागाः आसन् । ते विभागाः इतः परं न भवन्ति ।
१६. प्रश्नपत्रे आरोहणक्रमेण अङ्कयोजनं कृतम् ।

## प्रयोजनानि

७. छात्राः अङ्काधारितं पठनं, अध्यापकाः अङ्काधारितं पाठनं, पोषकाः अङ्काधारितं चिन्तनं दूरीकुर्वन्ति ।

८. पाठ्यपुस्तके प्रदत्तान् सर्वान् पाठान् शिक्षकाः पाठयन्ति । छात्राः पठन्ति च ।

९. गुणात्मकं चिन्तनं, बोधनं, मौल्यमापनानि च भवन्ति ।

१०. छात्रेषु लेखनं, पठनं, भाषणं, श्रवणम् प्रभृतीनि भाषाकौशलानि अभिवर्धन्ते

११. दीर्घोत्तरयुक्तानां प्रश्नानां कृते छात्रैः अधिकम् अवधानं दीयते ।

१२. छात्रेषु विषयाभिव्यक्तिसामर्थ्यम् विवर्धते ।

### प्रश्नपत्रस्य विन्यासे कृतं परिवर्तनम्

### विषयः – तृतीयभाषा संस्कृतम्

गरिष्ठाङ्कः : १०० अवधिः – २.४५ घण्टाः

**Private Fresh**

**१. उद्दिष्टानुगुणं प्रामुख्यम्**

| **2018-19** | | | **2019-20** | | |
|---|---|---|---|---|---|
| **उद्दिष्टानि** | **प्रतिशतम्** | **प्रदत्ताङ्काः** | **उद्दिष्टानि** | **प्रतिशतम्** | **प्रदत्ताङ्काः** |
| स्मरणम् | 20 | 20 | स्मरणम् | 20 | 20 |
| धारणम् | 40 | 40 | धारणम् | 32 | 32 |
| अभिव्यक्तिः | 36 | 36 | अभिव्यक्तिः | 44 | 44 |
| प्रशंसा | 04 | 04 | प्रशंसा | 04 | 04 |
| **आहत्य** | **100** | **100** | **आहत्य** | **100** | **100** |

१. धारणात्मकप्रश्नानां अष्ट-अङ्काः न्यूनाः जाताः ।

३. अभिव्यक्तौ अष्टौ अङ्काः अधिकाः कृताः ।

**२. विषयानुगुणं प्रामुख्यम्**

| 2018-2019 | | | | 2019-2020 | | | |
|---|---|---|---|---|---|---|---|
| **विषयाः** | **प्रतिशतम्** | **प्रदत्ताङ्काः** | **प्रश्नसंख्या** | **विषयाः** | **प्रतिशतम्** | **प्रदत्ताङ्काः** | **प्रश्नसंख्या** |
| **गद्यम्** | 37 | 37 | 20 | **गद्यम्** | 30 | 30 | 16 |
| **पद्यम्** | 25 | 25 | 18 | **पद्यम्** | 31 | 31 | 14 |
| **पूरक – पाठाः** | 03 | 03 | 01 | **पूरक – पाठाः** | 04 | 04 | 01 |
| **अपठित–गद्यम्** | 04 | 04 | 01 | **अपठित–गद्यम्** | 05 | 05 | 01 |
| **व्याकरणम्** | 31 | 31 | 17 | **व्याकरणम्** | 30 | 30 | 15 |
| **आहत्य** | **100** | **100** | **57** | **आहत्य** | **100** | **100** | **47** |

१. गद्यभागे सप्त – अङ्काः न्यूनाः जाताः ॥
२. पद्यभागे षट्–अङ्काःअधिकाः जाताः ।
३. पूरकपाठयोः कृते एकः अङ्कः अधिकः कृतः ।
४. अपठितगद्यस्य कृते एकः अङ्कः अधिकः कृतः ।
४. व्याकरणविभागे एकः अङ्कः न्यूनीकृतः ।
५. आहत्य दशप्रश्नाः न्यूनाः कृताः ।

**३. प्रश्नानुगुणं प्रामुख्यम्**

| 2018-19 | | | | | 2019-20 | | | | |
|---|---|---|---|---|---|---|---|---|---|
| **प्रश्नानां स्वरूपम्** | **प्रतिशतम्** | **प्रदत्ताः अङ्काः** | **प्रश्नानां संख्याः** | **अपेक्षितः समयः** | **प्रश्नानां स्वरूपम्** | **प्रतिशतम्** | **प्रदत्ताः अङ्काः** | **प्रश्नानां संख्याः** | **अपेक्षितः समयः** |
| वस्तुनिष्ठः | 19 | 19 | 19 | 25 | वस्तुनिष्ठः | 15 | 15 | 15 | 20 |
| अतिलघूत्तरम् | 14 | 14 | 14 | 20 | अतिलघूत्तरम् | 05 | 05 | 5 | 10 |
| लघूत्तरम् | 22 | 22 | 11 | 30 | लघूत्तरम् | 20 | 20 | 10 | 30 |
| दीर्घोत्तरम्–१ | 24 | 24 | 8 | 40 | दीर्घोत्तरम्–१ | 33 | 33 | 11 | 40 |
| दीर्घोत्तरम्–२ | 16 | 16 | 4 | 25 | दीर्घोत्तरम्–२ | 12 | 12 | 03 | 20 |
| दीर्घोत्तरम्–३ | 5 | 5 | 1 | 10 | दीर्घोत्तरम्–३ | 15 | 15 | 03 | 30 |
| **आहत्य** | **100** | **100** | **57** | **150+15** | **आहत्य** | **100** | **100** | **47** | **150+15** |

१. वस्तुनिष्ठप्रश्नेषु चत्वारः अङ्काः न्यूनाः जाताः ।
२. अतिलघूत्तरप्रश्नेषु नव अङ्काः न्यूनाः कृताः ।
३. लघूत्तरे अङ्कद्वयं न्यूनीकृतम् ।
४. दीर्घोत्तरं –१ मध्ये नव अङ्काः अधिकाः जाताः ।
५. दीर्घोत्तरं – २ मध्ये चत्वारः अङ्काः न्यूनाः कृताः ।
६. दीर्घोत्तरं – ३ मध्ये दश–अङ्काः अधिकाः जाताः ।
७. प्रश्नानां संख्यासु अपि परिवर्तनं जातम् । आहत्य दशप्रश्नाः न्यूनाः जाताः ।

**४. प्रश्नस्तराः**

| **2018-19** | | **2019-20** | |
|---|---|---|---|
| **स्तराः** | **प्रतिशतम्** | **स्तराः** | **प्रतिशतम्** |
| सुलभः | 30 | सुलभः | 30 |
| साधारणः | 50 | साधारणः | 50 |
| कठिनः | 20 | कठिनः | 20 |

१. अत्र किमपि परिवर्तनं न कृतम्

### ५. प्रश्नप्रकाराः अङ्कवितरणञ्च

| 2018-19 | | 2019-20 | |
|---|---|---|---|
| **प्रश्नप्रकाराः** | **अङ्कयोजनम्** | **प्रश्नप्रकाराः** | **अङ्कयोजनम्** |
| बहुविकल्पः | 12 x 1 = 12 | बहुविकल्पः | 10 x 1 = 10 |
| संयोज्य लिखत | 4 x 1 = 04 | चतुर्थपदम् | 5 x 1 = 05 |
| रिक्तस्थानं पूरयत | 3 x 1 = 03 | ----- | ----- |
| एकवाक्यम् | 14 x 1 = 14 | एकवाक्यम् | 5x 1 = 05 |
| लघूत्तरम् –2-3 वाक्यानि | 11x 2 = 22 | लघूत्तरम् –2-3 वाक्यानि | 10x 2 = 20 |
| दीर्घोत्तरम् –१ 3-4/5-6 वाक्यानि | 8x 3 = 24 | दीर्घोत्तरम् –१ 3-4/5-6 वाक्यानि | 11 x 3 = 33 |
| दीर्घोत्तरम् –२ 10 वाक्यानि | 4x 4 = 16 | दीर्घोत्तरम् –२ 10 वाक्यानि | 3x 4 = 12 |
| दीर्घोत्तरम् –३ 10 वाक्यानि | 1x 5 = 5 | दीर्घोत्तरम् –३ 10 वाक्यानि | 3x 5 = 15 |
| **आहत्य** | **57 / 100** | **आहत्य** | **47 / 100** |

१. प्रश्नप्रकारेषु विशेषरूपेण परिवर्तनं न जातम् । अङ्कयोजने परिवर्तनं कृतम् ।

२. लघूत्तरप्रश्नानां दीर्घोत्तरप्रश्नानां च पर्यायप्रश्नाः भवन्ति ।

**कर्नाटकप्रौढशिक्षण–परीक्षामण्डली**

**मार्गदर्शि प्रश्नपत्रम् – 1**

**2019-2020**

**(Regular Fresh)**

**विषयः – तृतीयभाषा संस्कृतम्** **विषयसङ्केतः – 67 S**

**समयः – 2.30 घण्टाः** **अङ्काः –80**

**I. अधोलिखितेभ्यः प्रश्नेभ्यः चत्वारः विकल्पाः प्रदत्ताः । तेषु समुचितं विकल्पं चित्वा क्रमाक्षरेण सह लिखत ।** **8 x 1 = 8**

1. महाबलः: – अस्य समानार्थकपदम् इदं भवति ।
   a) विष्णुः b) शिवः
   c) गणेशः d) शारदा
2. नृत्यन्ति – अत्र एषः लकारः वर्तते ।
   a) लिट् लकारः । b) लङ् लकारः ।
   c) लोट् लकारः । d) लट् लकारः ।
3. ग्रन्थालये – अत्र एषा विभक्तिः भवति ।
   a) सप्तमी b) तृतीया
   c) चतुर्थी d) पञ्चमी
4. देवाः – अस्य विरुद्धार्थकपदम् इदं भवति ।
   a) दानवाः b) पशवः
   c) मानवाः d) गुरवः
5. पठितव्यः – अत्र एषः प्रत्ययः भवति ।
   a) तव्यत् b) क्त
   c) क्त्वा d) ल्यप्
6. गच्छ – अत्र एषः पुरुषः वर्तते ।
   a) प्रथमः b) मध्यमः
   c) उत्तमः d) अन्यः
7. रामाय – अत्र एतत् कारकं भवति ।
   a) कर्तृकारकम् b) कर्मकारकम्
   c) करणकारकम् d) सम्प्रदानकारकम्
8. अस्मदीयः – अत्र विग्रहवाक्यं एवं भवति ।
   a) अस्माकम् अयम् b) तस्य अयम्
   c) भवतः अयम् d) युष्माकम् अयम्

**II. चतुर्थं पदं लिखत ।** **4 x 1 = 4**

9. अङ्गराजः – कर्णः :: महत्तरा – ______।
10. गुरुः – दक्षिणामूर्तिः :: निशामणिः – _____।
11. परम्परा – सम्प्रदायः :: ध्येयोद्देशौ – _______।
12. दशकण्ठः – रावणः :: दाशरथिः – ______।

**III. एकवाक्येन उत्तरं लिखत ।** **4x 1 = 4**

13. मेलायाः आयोजिका संस्था का ?
14. कर्णस्य सारथिः कः ?
15. विवेकानन्दस्य शिष्यः कः ?
16. अक्षयाः निधयः कति सन्ति ?

**IV. द्वित्रैः वाक्यैः उत्तरं लिखत ।** **4 x2=8**

17. पुस्तकमेलायाः वेदिकायां के के अंशाः आसन् ?
18. ग्रन्थालयस्य ग्रन्थपालः किम् अचिन्तवान् ?
19. गणेशः कीदृशः ?

अथवा

शारदा कीदृशी ?

20. रघुवंशीयराजाः कथम् आसन् ?

**V. संस्कृतभाषया अनुवादं कुरुत ।** **1 x2=2**

21. ಶಿವಪಾರ್ವತಿಯರ ಪುತ್ರನು ಗಣೇಶನು. ಅವನನ್ನು ಎಲ್ಲರೂ ಕಾರ್ಯಾರಂಭದಲ್ಲಿ ಪೂಜಿಸುತ್ತಾರೆ.

**VI. कर्नाटकभाषया आङ्ग्लभाषया वा अनुवादं कुरुत ।** **1 x2=2**

22. उद्याने विशालः सरोवरः अस्ति । तत्र पक्षिणः विहरन्ति ।

**VII. विग्रहवाक्यं लिखत ।** **1 x2=2**

23. a) यथाविधि b) महोत्सवः

अथवा

**समस्तपदं लिखत ।**

a) शूलं पाणौ यस्य सः = b) वृक्षस्य समीपम् =

**VIII. लक्षणं विलिख्य अलङ्कारस्य नाम लिखत ।** **1 x2=2**

24. मुखम् चन्द्रः इव सुन्दरम् ।

**IX. यथानिर्देशम् उत्तरं त्रिचतुरैः वाक्यैः लिखत ।** **2 x3=6**

25. भवतःका गतिः भवेत् ?

कः पाठः ? कः अवदत् ? कम् अवदत् ?

26. जित्वा पृथिवीं ददामि ।

कः पाठः ? कः अवदत् ? कम् अवदत् ?

**X. सन्धिं विभज्य नाम लिखत ।** **1 x3=3**

27. a) गुरुर्ब्रह्मा । b) योगेनान्ते । c) युगादारभ्य ।

**XI. प्रस्तारं विलिख्य गणविभागं कृत्वा छन्दोनाम लिखत ।** **1 x3=3**

28. सीतां विचेतुं पथि चारणानाम् ।

**XII. कवेः देश–काल–कृतीनां विषये त्रिचतुरैः वाक्यैः लिखत ।** **1 x3=3**

29. वेदव्यासः अथवा भासः

**XIII. पद्यपाठस्य नाम उल्लिख्य तात्पर्यं पञ्चषैः वाक्यैः कर्नाटकभाषया संस्कृतभाषया आङ्ग्लभाषया वा लिखत ।** **3 x 3=9**

30. चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन
आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ ॥

31. रघूणामन्वयं वक्ष्ये तनुवाग्विभवोऽपि सन् ।
तद्गुणैः कर्णमागत्य चापलाय प्रचोदितः ॥

32. परमस्माकं त्वेको देशः परम्परानस्त्वेकैव ।
सिद्धिसाधने श्रद्धास्थानम् ध्येयोद्देशौ न तु भिन्नौ ॥

**XIV. पद्यपाठस्य नाम विलिख्य पद्यं पूरयत ।** **1 x3=3**

33. शीलं -------------
------------- निधिः ॥

**XV. दशवाक्यैः उत्तरं कर्नाटकभाषया संस्कृतभाषया आङ्ग्लभाषया वा लिखत ।** **2 x4=8**

34. मेलुकोटे क्षेत्रम् अधिकृत्य लिखत ।

अथवा

मेलुकोटे क्षेत्रे श्रीरामानुजाचार्यस्य योगदानं विवृणुत ।

35. भारतस्य आदर्शनारी 'उभयभारती' इति विषयं संगृह्य लिखत ।

**XVI. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरत ।** **1 x 4 = 4**

36. एकदा एकः अर्चकः कारणान्तरेण अन्यं ग्रामं गन्तुम् इच्छति । तदा पूजार्थं स्वपुत्रीं नियोजयति । सा बाला देवालयं गत्वा देवं पूजयति । पूजान्ते नैवेद्यम् अन्नं खादितुं देवं पुनः पुनः प्रार्थयते । परं देवः अन्नं न खादति । तदा सा खिन्ना भूत्वा स्वशिरः तत्रस्थ पाषाणे घर्षयित्वा आत्मानं हन्तुं प्रयतते । तस्याः भक्त्या सन्तुष्टो देवः प्रत्यक्षो भूत्वा अन्नं खादति ।

प्रश्नाः

१. कः अन्यं ग्रामं गन्तुम् इच्छति ?

२. देवः किं न खादति ?

३. बाला कथम् आत्मानं हन्तुं प्रयतते ?

४. सन्तुष्टो देवः किं करोति ?

**XVII. दशवाक्यैः प्रबन्धं लिखत ।** **1 x 4 =4**

37. स्वातन्त्र्योत्सवः अथवा कर्णाटकराज्योत्सवः

**XVIII. पत्रं लिखत ।** **1 x 5 =5**

38. दिनत्रयस्य विरामं सम्प्रार्थ्य मुख्योपाध्यायं प्रति विरामपत्रं लिखत ।

अथवा

स्वस्य अध्ययनप्रगतिम् उल्लिख्य मित्रं प्रति पत्रं लिखत ।

***************

# कर्नाटकप्रौढशिक्षण–परीक्षामण्डली
## मार्गदर्शि प्रश्नपत्रम् – 2
## 2019-2020
## (Regular Fresh)

विषयः – तृतीयभाषा संस्कृतम् | विषयसङ्केतः –67 S

समयः – 2.30 घण्टाः | अङ्काः – 80

**I. अधोलिखितेभ्यः प्रश्नेभ्यः चत्वारः विकल्पाः प्रदत्ताः । तेषु समुचितं विकल्पं चित्वा क्रमाक्षरेण सह लिखत ।** **8 x 1 = 8**

1. आचार्यः – अत्र एषा विभक्तिः वर्तते ।
   a) द्वितीया b) प्रथमा
   c) चतुर्थी d) सप्तमी
2. प्रेषयति – अत्र एषः लकारः वर्तते ।
   a) लोट् लकारः । b) लिट् लकारः ।
   c) लङ् लकारः । d) लट् लकारः ।
3. निशा – अस्य विरुद्धार्थकपदम् इदं भवति ।
   a) दिवा b) रात्रिः
   c) सायम् d) रजनी
4. मधुसूदनः – अस्य समानार्थकपदम् इदं भवति ।
   a) रामः b) कृष्णः
   c) अर्जुनः d) भीमः
5. अत्र समूहेतरपदम् इदं भवति ।
   a) कृत्वा b) गत्वा
   c) विमृश्य d) नत्वा
6. पठामि – अत्र एषः पुरुषः वर्तते ।
   a) प्रथमः b) मध्यमः
   c) उत्तमः d) अन्यः
7. छात्रः पाठं पठति – अत्र 'छात्रः' इति पदस्य कारकम् इदं भवति ।
   a) कर्तृकारकम् b) कर्मकारकम्
   c) करणकारकम् d) सम्प्रदानकारकम्
8. यथा– अत्र एषः प्रत्ययः अस्ति ।
   a) वतुप् b) थाल्
   c) छः d) म

**II. चतुर्थं पदं लिखत ।** **4 x 1 = 4**

9. दशकण्ठः _ रावणः :: जानकी – ______।

10. अङ्गराजः – कर्णः :: देहरक्षा – _____।

11. श्रीकृष्णः – गीताचार्यः :: पार्थः – _______।

12. हिमघ्नः _ सूर्यः :: सर्वदा – ______।

**III. एकवाक्येन उत्तरं लिखत ।** **4x 1 = 4**

13. मेलुकोटे कस्मिन् मण्डले अस्ति ?

14. अर्जुनः अन्ते किं ज्ञातवान् ?

15. सीतां कः अपहृतवान् ?

16. कतिविधाः जनाः देवं भजन्ते ?

**IV. द्वित्रैः वाक्यैः उत्तरं लिखत ।** **4 x2=8**

17. मेलुकोटे क्षेत्रस्य नामान्तराणि कानि ?

18. कर्णार्जुनयोः युद्धं कथम् आसीत् ?

19. दक्षिणामूर्तिं वर्णयत ।

20. रघुवंशीयराजाः कथम् आसन् ?

अथवा

कीदृशीम् उर्वीं दिलीपः एकपुरीमिव शशास ?

**V. संस्कृतभाषया अनुवादं कुरुत ।** **1 x2=2**

21. ಮಹಾಭಾರತದ ಭೀಷ್ಮಪರ್ವದಲ್ಲಿ ಭಗವದ್ಗೀತೆ ಇದೆ. ಇದನ್ನು ಶ್ರೀ ಕೃಷ್ಣನು ಅರ್ಜುನನಿಗೆ ಉಪದೇಶಿಸಿದನು.

**VI. कर्नाटकभाषया आङ्ग्लभाषया वा अनुवादं कुरुत ।** **1 x2=2**

22. गोदावरी नदीतीरे विशालः शाल्मलीतरुः अस्ति । तत्र अनेके पक्षिणः निवसन्ति ।

**VII. विग्रहवाक्यं लिखत ।** **1 x2=2**

23. a) शूलपाणिः b) ग्रामोत्सवः

अथवा

**समस्तपदं लिखत ।**

a) दिनं दिनम् = b) खगानाम् इन्द्रः =

**VIII. लक्षणं विलिख्य अलङ्कारस्य नाम लिखत ।** **1 x2=2**

24. सर्वदो माधवः पायात् ।

**IX. यथानिर्देशम् उत्तरं त्रिचतुरैः वाक्यैः लिखत ।** **2 x3=6**

25. गच्छ, अद्य अहं पुस्तकं न दास्यामि ।

कः पाठः ? कः अवदत् ? कम् अवदत् ?

26. सागर इव तिष्ठतु ते यशः ।
कः पाठः ? कः अवदत् ? कम् अवदत् ?

**X. सन्धिं विभज्य नाम लिखत ।** **1 x3=3**

27. a) रामस्तत्र b) पत्रालयः c) तदन्वये

**XI. प्रस्तारं विलिख्य गणविभागं कृत्वा छन्दोनाम लिखत ।** **1 x3=3**

28. स प्राण एव वसतीति विचित्रमेतत् ।

**XII. कवेः देश–काल–कृतीनां विषये त्रिचतुरैः वाक्यैः लिखत ।** **1 x3=3**

29. कालिदासः अथवा भोजराजः

**XIII. पद्यपाठस्य नाम उल्लिख्य तात्पर्यं पञ्चषैः वाक्यैः कर्नाटकभाषया संस्कृतभाषया आङ्ग्लभाषया वा लिखत ।** **3 x 3=9**

30. कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ।
मा कर्मफलहेतुर्भूः मा ते सङ्गोऽस्त्वकर्मणि ॥

31. आकारसदृशप्राज्ञः प्रज्ञया सदृशागमः ।
आगमैः सदृशारम्भः आरम्भसदृशोदयः ॥

32. भारतवासिषु बाह्यो भेदे बहुत्र बहुधा दृष्टेऽपि ।
आन्तरङ्गिकी संस्कृतिरेका सनातनी नो बध्नाति ॥

**XIV. पद्यपाठस्य नाम लिखित्वा पद्यं पूरयत ।** **1 x3=3**

33. सदयं ---------------
--------------- किम् ॥

**XV. दशवाक्यैः उत्तरं कर्नाटकभाषया संस्कृतभाषया आङ्ग्लभाषया वा लिखत ।** **2 x4=8**

34. विश्वसंस्कृतपुस्तकमेलायां के के अंशाः आसन् ?।

35. 'विक्रमः वेतालश्च' इति पाठस्य सारांशं सङ्गृह्य लिखत ।

अथवा

उभयभारती भारतस्य आदर्शनारी इति विषयं सङ्गृह्य लिखत ।

**XVI. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरत ।** **1 x 4 = 4**

36. कस्मिंश्चित् ग्रामे बहुकालपर्यन्तम् अनावृष्टिः आसीत् । भूमिः शुष्का जाता । पेयजलस्यापि अभावः जातः । तदा जनाः दैवज्ञस्य समीपं गत्वा पृष्टवन्तः । तदा सः त्रीणि वर्षाणि वृष्टिः न भविष्यति इति उक्तवान् । तत श्रुत्वा ग्रामवासिनः सर्वे जीवनार्थं बहुदूरं गतवन्तः । सः ग्रामः एव निर्जनः जातः ।

प्रश्नाः

१. बहुकालपर्यन्तं कुत्र अनावृष्टिः आसीत् ?

२. कस्य अभावः जातः ?

३. जनाः कस्य समीपं गत्वा पृष्टवन्तः ?

४. दैवज्ञः कति वर्षाणि वृष्टिः न भविष्यति इति उक्तवान् ?

**XVII. दशवाक्यैः प्रबन्धं लिखत ।** **1 x 4 =4**

37. परिसरः अथवा सङ्गणकयन्त्रम् ।

**XVIII. पत्रं लिखत ।** **1 x 5 =5**

38. दिनद्वयस्य विरामं सम्प्रार्थ्य मुख्योपाध्यायं प्रति विरामपत्रं लिखत ।

अथवा

प्रवासार्थं धनं प्रेषयितुं पितरं प्रति पत्रं लिखत ।

***************

**कर्नाटकप्रौढशिक्षण–परीक्षामण्डली**

**मार्गदर्शि प्रश्नपत्रम् – 1**

**2019-2020**

**( Private Fresh)**

**विषयः – तृतीयभाषा संस्कृतम्** **विषयसङ्केतः – 67 S**

**समयः – 2.45 घण्टाः** **अङ्काः –100**

**I. अधोलिखितेभ्यः प्रश्नेभ्यः चत्वारः विकल्पाः प्रदत्ताः । तेषु समुचितं विकल्पं चित्वा क्रमाक्षरेण सह लिखत ।** 10 x 1 = 10

1. महाबलः: – अस्य समानार्थकपदम् इदं भवति ।
   a) विष्णुः b) शिवः
   c) गणेशः d) शारदा
2. नृत्यन्ति – अत्र एषः लकारः वर्तते ।
   a) लिट् लकारः । b) लङ् लकारः ।
   c) लोट् लकारः । d) लट् लकारः ।
3. ग्रन्थालये – अत्र एषा विभक्तिः भवति ।
   a) सप्तमी b) तृतीया
   c) चतुर्थी d) पञ्चमी
4. देवाः – अस्य विरुद्धार्थकपदम् इदं भवति ।
   a) दानवाः b) पशवः
   c) मानवाः d) गुरवः
5. पठितव्यः – अत्र एषः प्रत्ययः भवति ।
   a) तव्यत् b) क्त
   c) क्त्वा d) ल्यप्
6. गच्छ – अत्र एषः पुरुषः अस्ति ।
   a) प्रथमः b) मध्यमः
   c) उत्तमः d) अन्यः
7. रामाय – अत्र एतत् कारकं भवति ।
   a) कर्तृ b) कर्म
   c) करणम् d) सम्प्रदानम्
8. अस्मदीयः – अत्र विग्रहवाक्यं एवं भवति ।
   a) अस्माकम् अयम् b) तस्य अयम्
   c) भवतः अयम् d) युष्माकम् अयम्

9. गच्छन्, हसन्, पठन्, ज्ञातम् – अत्र समूहेतरपदम् इदं भवति ।

| | | | |
|---|---|---|---|
| a) | गच्छन् | b) | हसन् |
| c) | पठन् | d) | ज्ञातुम् |

10. अपादानकारकस्य विभक्तिः एषा भवति ।

| | | | |
|---|---|---|---|
| a) | तृतीया | b) | चतुर्थी |
| c) | पञ्चमी | d) | सप्तमी |

**II. चतुर्थं पदं लिखत ।** **5 x 1 = 5**

11. अङ्गराजः – कर्णः :: महत्तरा – ______ ।
12. गुरुः – दक्षिणामूर्तिः :: निशामणिः – _____ ।
13. परम्परा – सम्प्रदायः :: ध्येयोद्देशौ – _______ ।
14. दशकण्ठः _ रावणः :: दाशरथिः – ______ ।
15. अशनम् _ आहारः :: उद्घोषः – ______ ।

**III. एकवाक्येन उत्तरं लिखत ।** **5x 1 = 5**

16. मेलायाः आयोजिका संस्था का ?
17. कर्णस्य सारथिः कः ?
18. विवेकानन्दस्य शिष्यः कः ?
19. अक्षयाः निधयः कति सन्ति ?
20. पठनार्थं का आवश्यकी ?

**IV. द्वित्रैः वाक्यैः उत्तरं लिखत ।** **6 x2=12**

21. पुस्तकमेलायाः वेदिकायां के के अंशाः आसन् ?
22. ग्रन्थालयस्य ग्रन्थपालः किम् अचिन्तवान् ?
23. गणेशः कीदृशः ?

    अथवा

    शारदा कीदृशी ?
24. रघुवंशीयराजाः कथम् आसन् ?
25. मेलुकोटे क्षेत्रस्य नामान्तराणि कानि ?
26. अर्जुनः कृष्णं किम् अपृच्छत् ?

**V. संस्कृतभाषया अनुवादं कुरुत ।** **1 x2=2**

27. ಶಿವಪಾರ್ವತಿಯರ ಪುತ್ರನು ಗಣೇಶನು. ಅವನನ್ನು ಎಲ್ಲರೂ ಕಾರ್ಯಾರಂಭದಲ್ಲಿ ಪೂಜಿಸುತ್ತಾರೆ.

**VI. कर्नाटकभाषया आङ्ग्लभाषया वा अनुवादं कुरुत ।** **1 x2=2**

28. उद्याने विशालः सरोवरः अस्ति । तत्र पक्षिणः विहरन्ति ।

**VII. विग्रहवाक्यं लिखत ।** **1 x2=2**

29. a) यथाविधि b) महोत्सवः

**अथवा**

**समस्तपदं लिखत ।**

a) शूलं पाणौ यस्य सः = b) वृक्षस्य समीपम् =

**VIII. लक्षणं विलिख्य अलङ्कारस्य नाम लिखत ।** **1 x2=2**

30. मुखम् चन्द्रः इव सुन्दरम् ।

**X. यथानिर्देशम् उत्तरं त्रिचतुरैः वाक्यैः लिखत ।** **2 x3=6**

31. भवतः का गतिः भवेत् ?

कः पाठः ? कः अवदत् ? कम् अवदत् ?

32. जित्वा पृथिवीं ददामि ।

कः पाठः ? कः अवदत् ? कम् अवदत् ?

**IX. सन्धिं विभज्य नाम लिखत ।** **1 x3=3**

33. a) गुरुर्ब्रह्मा । b) योगेनान्ते । c) युगादारभ्य ।

**XI. प्रस्तारं विलिख्य गणविभागं कृत्वा छन्दोनाम लिखत ।** **1 x3=3**

34. सीतां विचेतुं पथि चारणानाम् ।

**XII. कवेः देश–काल–कृतीनां विषये त्रिचतुरैः वाक्यैः लिखत ।** **2 x3=6**

35. वेदव्यासः अथवा भासः

36. भोजराजः

**XIII. पद्यपाठस्य नाम उल्लिख्य तात्पर्यं पञ्चषैः वाक्यैः कर्नाटकभाषया संस्कृतभाषया आङ्ग्लभाषया वा लिखत ।** **4 x 3=12**

37. चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन
आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ ॥

38. रघूणामन्वयं वक्ष्ये तनुवाग्विभवोऽपि सन् ।
तद्गुणैः कर्णमागत्य चापलाय प्रचोदितः ॥

39. परमस्माकं त्वेको देशः परम्परानस्त्वेकैव ।
सिद्धिसाधने श्रद्धास्थानम् ध्येयोद्देशौ न तु भिन्नौ ॥

40. श्रद्धावान् लभते ज्ञानम् तत्परः संयतेन्द्रियः ।
ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति ॥

**XIV. पद्यपाठस्य नाम विलिख्य पद्यं पूरयत ।** **1 x3=3**

41. शीलं -------------
------------- निधिः ॥

**XV. दशवाक्यैः उत्तरं कर्नाटकभाषया संस्कृतभाषया आङ्ग्लभाषया वा लिखत ।** **3 x4=12**

42. मेलुकोटे क्षेत्रम् अधिकृत्य लिखत ।

अथवा

मेलुकोटे क्षेत्रे श्रीरामानुजाचार्यस्य योगदानं विवृणुत ।

43. भारतस्य आदर्शनारी 'उभयभारती' इति विषयं संगृह्य लिखत ।

44. 'सनातनीं नो बध्नाति' पद्यस्य तात्पर्यं लिखत ।

**XVI. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरत ।** **1 x 5 = 5**

45. एकदा एकः अर्चकः कारणान्तरेण अन्यं ग्रामं गन्तुम् इच्छति । तदा पूजार्थं स्वपुत्रीं नियोजयति । सा बाला देवालयं गत्वा देवं पूजयति । पूजान्ते नैवेद्यम् अन्नं खादितुं देवं पुनः पुनः प्रार्थयते । परं देवः अन्नं न खादति । तदा सा खिन्ना भूत्वा स्वशिरः तत्रस्थ पाषाणे घर्षयित्वा आत्मानं हन्तुं प्रयतते । तस्याः भक्त्या सन्तुष्टो देवः प्रत्यक्षो भूत्वा अन्नं खादति ।

प्रश्नाः

१. कः अन्यं ग्रामं गन्तुम् इच्छति ?

२. देवः किं न खादति ?

३. बाला कथम् आत्मानं हन्तुं प्रयतते ?

४. सन्तुष्टो देवः किं करोति ?

५. बाला कं पुनः पुनः प्रार्थयते ?

**XVII. दशवाक्यैः प्रबन्धं लिखत ।** **1 x 5 =5**

46. स्वातन्त्र्योत्सवः अथवा कर्णाटकराज्योत्सवः

**XVIII. पत्रं लिखत ।** **1 x 5 =5**

47. दिनत्रयस्य विरामं सम्प्रार्थ्य मुख्योपाध्यायं प्रति विरामपत्रं लिखत ।

अथवा

स्वस्य अध्ययनप्रगतिम् उल्लिख्य मित्रं प्रति पत्रमेकं लिखत ।

***************

# कर्नाटकप्रौढशिक्षण–परीक्षामण्डली

## मार्गदर्शि प्रश्नपत्रम् – 2

**2019-2020**

**(Private Fresh)**

**विषयः – तृतीयभाषा संस्कृतम्** **विषयसङ्केतः – 67 S**

**समयः – 2.45 घण्टाः** **अङ्काः –100**

**I. अधोलिखितेभ्यः प्रश्नेभ्यः चत्वारः विकल्पाः प्रदत्ताः । तेषु समुचितं विकल्पं चित्वा क्रमाक्षरेण सह लिखत ।** **10 x 1 = 10**

1. आचार्यः – अत्र एषा विभक्तिः वर्तते ।
   a) द्वितीया b) प्रथमा
   c) चतुर्थी d) सप्तमी
2. प्रेषयति – अत्र एषः लकारः वर्तते ।
   a) लोट् लकारः । b) लिट् लकारः ।
   c) लङ् लकारः । d) लट् लकारः ।
3. निशा – अस्य विरुद्धार्थकपदम् इदं भवति ।
   a) दिवा b) रात्रिः
   c) सायम् d) रजनी
4. मधुसूदनः – अस्य समानार्थकपदम् इदं भवति ।
   a) रामः b) कृष्णः
   c) अर्जुनः d) भीमः
5. अत्र समूहेतरपदम् इदं भवति ।
   a) कृत्वा b) गत्वा
   c) विमृश्य d) नत्वा
6. पठामि – अत्र एषः पुरुषः वर्तते ।
   a) प्रथमः b) मध्यमः
   c) उत्तमः d) अन्यः
7. छात्रः पाठं पठति – अत्र छात्रः इति पदस्य कारकम् इदं भवति ।
   a) कर्तृकारकम् b) कर्मकारकम्
   c) करणकारकम् d) सम्प्रदानकारकम्
8. यथा– अत्र एषः प्रत्ययः अस्ति ।
   a) वतुप् b) थाल्
   c) छः d) म

9. लिखन् – अत्र एषः प्रत्ययः अस्ति ।

| | | | |
|---|---|---|---|
| a) | शतृ | b) | क्त्वा |
| c) | क्तवतु | d) | तुमुन् |

10. अधिकरणकारकस्य विभक्तिः एषा भवति ।

| | | | |
|---|---|---|---|
| a) | चतुर्थीविभक्तिः | b) | सप्तमीविभक्तिः |
| c) | पञ्चमीविभक्तिः | d) | तृतीयाविभक्तिः |

**II. चतुर्थं पदं लिखत ।** **5 x 1 = 5**

| | | | | |
|---|---|---|---|---|
| 11. दशकण्ठः – रावणः | :: | जानकी | – | ______। |
| 12. अङ्गराजः – कर्णः | :: | देहरक्षा | – | _____। |
| 13. श्रीकृष्णः – गीताचार्यः | :: | पार्थः | – | ________। |
| 14. हिमघ्नः – सूर्यः | :: | सर्वदा | – | ______। |
| 15. निशामणिः – शिरोमणिः | :: | दीर्घायुः | – | ______। |

**III. एकवाक्येन उत्तरं लिखत ।** **5x 1 = 5**

16. मेलुकोटे कस्मिन् मण्डले अस्ति ?

17. अर्जुनः अन्ते किं ज्ञातवान् ?

18. सीतां कः अपहृतवान् ?

19. कतिविधाः जनाः देवं भजन्ते ?

20. सूर्यः केषां पतिः ?

**IV. द्वित्रैः वाक्यैः उत्तरं लिखत ।** **6 x2=12**

21. मेलुकोटे क्षेत्रस्य नामान्तराणि कानि ?

22. कर्णार्जुनयोः युद्धं कथम् आसीत् ?

23. दक्षिणामूर्तिं वर्णयत ।

24. रघुवंशीयराजाः कथम् आसन् ?

अथवा

कीदृशीम् उर्वीं दिलीपः एकपुरीमिव शशास ?

25. विश्वसंस्कृतमेलायां के के अंशाः आसन् ?

26. रामः सीतां विना कथं वसति ?

**V. संस्कृतभाषया अनुवादं कुरुत ।** **1 x2=2**

27. ಮಹಾಭಾರತದ ಭೀಷ್ಮಪರ್ವದಲ್ಲಿ ಭಗವದ್ಗೀತೆ ಇದೆ. ಇದನ್ನು ಶ್ರೀ ಕೃಷ್ಣನು ಅರ್ಜುನನಿಗೆ ಉಪದೇಶಿಸಿದನು.

**VI. कर्नाटकभाषया आङ्ग्लभाषया वा अनुवादं कुरुत ।** **1 x2=2**

28. गोदावरी नदीतीरे विशालः शाल्मलीतरुः अस्ति । तत्र अनेके पक्षिणः निवसन्ति ।

**VII. विग्रहवाक्यं लिखत ।** **1 x2=2**

29. a) शूलपाणिः b) ग्रामोत्सवः

अथवा

**समस्तपदं लिखत ।**

a) दिनं दिनम् = b) खगानाम् इन्द्रः =

**VIII. लक्षणं विलिख्य अलङ्कारस्य नाम लिखत ।** **1 x2=2**

30. सर्वदो माधवः पायात् ।

**IX. यथानिर्देशम् उत्तरं त्रिचतुरैः वाक्यैः उत्तरं लिखत ।** **2 x3=6**

31. गच्छ; अद्य अहं पुस्तकं न दास्यामि ।

कः पाठः ? कः अवदत् ? कम् अवदत् ?

32. सागर इव तिष्ठतु ते यशः ।

कः पाठः ? कः अवदत् ? कम् अवदत् ?

**X. सन्धिं विभज्य नाम लिखत ।** **1 x3=3**

33. a) गुरुर्ब्रह्मा । b) योगेनान्ते । c) युगादारभ्य ।

**XI. प्रस्तारं विलिख्य गणविभागं कृत्वा छन्दोनाम लिखत ।** **1 x3=3**

34. स प्राण एव वसतीति विचित्रमेतत् ।

**XII. कवेः देश–काल–कृतीनां विषये त्रिचतुरैः वाक्यैः लिखत ।** **2 x3=6**

35. कालिदासः अथवा डा ॥ बा.श्री. रामकृष्णराव्

36. भोजराजः

**XIII. पद्यपाठस्य नाम उल्लिख्य तात्पर्यं पञ्चषैः वाक्यैः कर्नाटकभाषया संस्कृतभाषया आङ्ग्लभाषया वा लिखत ।** **3 x 4=12**

37. कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ।
मा कर्मफलहेतुर्भूः मा ते सङ्गोऽस्त्वकर्मणि ॥

38. आकारसदृशप्राज्ञः प्रज्ञया सदृशागमः ।
आगमैः सदृशारम्भः आरम्भसदृशोदयः ॥

39. भारतवासिषु बाह्यो भेदे बहुत्र बहुधा दृष्टेऽपि ।
आन्तरङ्गिकी संस्कृतिरेका सनातनी नो बध्नाति ॥

40. ततो हनुमान् दशकण्ठनीतां
सीतां विचेतुं पथिचारणानाम् ।
महेन्द्रशैलस्य खगेन्द्रवेगः
प्रस्थादुदस्यान् प्रथमानवेगः ॥

**XIV. पद्यपाठस्य नाम विलिख्य पद्यं पूरयत ।** **1 x3=3**

41. सदयं ------------- ।
------------- किम् ॥

**XV. दशवाक्यैः उत्तरं कर्नाटकभाषया संस्कृतभाषया आङ्ग्लभाषया वा लिखत ।** **3 x4=12**

42. विश्वसंस्कृतपुस्तकमेलायां के के अंशाः आसन् ?

43. 'विक्रमः वेतालश्च' इति पाठस्य सारांशं सङ्गृह्य लिखत ।

अथवा

उभयभारती भारतस्य आदर्शनारी इति विषयं सङ्गृह्य लिखत ।

44. भारतस्य विविधतायां एकतां वर्णयत ।

**XVI. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरत ।** **1 x5 = 5**

45. कस्मिंश्चित् ग्रामे बहुकालपर्यन्तम् अनावृष्टिः आसीत् । भूमिः शुष्का जाता । पेयजलस्यापि अभावः जातः । तदा जनाः दैवज्ञस्य समीपं गत्वा पृष्टवन्तः । तदा सः त्रीणि वर्षाणि वृष्टिः न भविष्यति इति उक्तवान् । तत श्रुत्वा ग्रामवासिनः सर्वे जीवनार्थं बहुदूरं गतवन्तः । सः ग्रामः एव निर्जनः जातः ।

प्रश्नाः

१. बहुकालपर्यन्तं कुत्र अनावृष्टिः आसीत् ?

२. कस्य अभावः जातः ?

३. जनाः कस्य समीपं गत्वा पृष्टवन्तः ?

४. दैवज्ञः कति वर्षाणि वृष्टिः न भविष्यति इति उक्तवान् ?

५. ग्रामवासिनः सर्वे किमर्थं बहुदूरं गतवन्तः ?

**XVII. दशवाक्यैः प्रबन्धं लिखत ।** **1 x 5 =5**

46. परिसरः अथवा सङ्गणकयन्त्रम् ।

**XVIII. पत्रं लिखत ।** **1 x 5 =5**

47. दिनद्वयस्य विरामं सम्प्रार्थ्य वर्गोपाध्यायं प्रति विरामपत्रं लिखत ।

अथवा

प्रवासार्थं धनं प्रेषयितुं पितरं प्रति पत्रं लिखत ।

*****************